पाचनत्वम्। हृद्यत्वम्। वृष्यत्वम्। लघुत्वम्। अग्निदीपनत्वम्। स्निग्धत्वम्। कासदोषत्रयक्रिमिनाशित्वञ्च। तस्य मूलादिगुणाः।
"पटोलस्य भवेन्मूलं विरेचनकरं सुखात्।
नालं श्लेष्महरं पत्रं पित्तहारि फलं पुनः॥
दोषत्रयहरं प्रोक्तं तद्वत्तिक्ता पटोलिका॥"
इति भावप्रकाशः॥
अपि च राजवल्लभः।
"पटोलं कफपित्तास्रग्ज्वरकुष्ठव्रणापहम्।
विसर्पनयनव्याधित्रिदोषगरनाशिनौ।
पटोलफलकश्चेति किञ्चिद्गुणान्तरावुभौ॥"

पटोलकः, पुं, (पटोल इव कायति प्रकाशते इति कै+कः।) शुक्तिः। इति शब्दमाला॥

पटोलिका, स्त्री, (पटोल+कन्+टाप्+अत इत्वञ्च।) फलविशेषः। झिङ्गा इति भाषा। पोरलि इति ख्याता। इति केचित्। इति भरतः॥ तत्पर्य्यायः। ज्योत्स्नी २ जाली ३। इत्यमरः। २। ४। ११८॥ ज्योत्स्ना ४। इति स्वामी॥

पटोली, स्त्री, (पटोल+जातित्वात् ङीष्।) ज्योत्स्नी। इति मेदिनी॥ (झिङ्गा इति भाषा॥ यथा, गारुड़े १९८ अध्याये।
"पटोलीमुस्तकाभ्याञ्च वासकेन च नाशयेत्॥")

पट्टं, क्ली, (पट् गतौ+क्तः। नेट्।) नगरम्। इति शब्दरत्नावली॥

पट्टः, पुं, (पट्+क्तः। नेट्।) पेषणपाषाणः। शिल् इति भाषा॥ (यथा, रघुः। १८। १७।
"तस्याभवत् सूनुरुदारशीलः
शिलः शिलापट्टविशालवक्षाः॥")
व्रणादीनां बन्धनम्। पटी इति भाषा॥ चतुष्पथः। चौमाता रास्ता इति भाषा॥ राजादिशासनान्तरम्। पाट्टा इति भाषा॥ (यथा, मार्कण्डेये। ३६। ८।
"तदास्मात् पुत्त्र! निष्कृष्य मद्दत्तादङ्गुलीयकात्।
वाच्यन्ते शासनं पट्टे सूक्ष्माक्षरनिवेशितम्॥")
पीठः। इति मेदिनी॥ पिड़ि इति भाषा॥ फलकः। इति त्रिकाण्डशेषः॥ ढाल इति भाषा॥ उष्णीषादिः। इति स्वामी॥ पाग् इत्यादि भाषा॥ उत्तरीयादिः। इति सुभूतिः॥ एक पाट्टा इति भाषा॥ (यथा, भट्टिः।१०।६०।
"गलितमिव भुवो विलोक्य रामं
धरणिधरस्तनशुक्लपट्टचीनम्॥")
कौषेयः। इति मुकुटः॥ पाट् रेशम् इति च भाषा। लोहितकौषेयमुष्णीषादि। इति भरतः॥ राङ्गा रेशमी पाग् इत्यादि भाषा॥ (नृपादीनां किरीटविशेषस्वरूपपट्टलक्षणं वृहत्संहितायां ४९ अध्याये उक्तम्। तद्यथा,—
"विस्तरशो निर्द्दिष्टं पट्टानां लक्षणं यदाचार्य्यैः।
तत् संक्षेपः क्रियते मयात्र सकलार्थसम्पन्नः॥
पट्टः शुभदो राज्ञां मध्येऽष्टावङ्गुलानि विस्तीर्णः।
सप्तनरेन्द्रमहिष्याः षड्युवराजस्य निर्द्दिष्टः॥
चतुरङ्गुलविस्तारः पट्टः सेनापतेर्भवति मध्ये।
द्वे च प्रसादपट्टः पञ्च ते कीर्त्तिताः पट्टाः॥
सर्व्वे द्विगुणायामा मध्यादर्द्धेन पार्श्वविस्तीर्णाः।
सर्व्वे च शुद्धकाञ्चनविनिर्म्मिताः श्रेयसो वृद्ध्यै॥
पञ्चशिखो भूमिपतेस्त्रिशिखो युवराजपार्थिवमहिष्योः।
एकशिखः सैन्यपतेः प्रसादपट्टो विना शिखया॥
क्रियमाणं यदि पत्रं सुखेन विस्तारमेति पट्टस्य।
वृद्धिजयौ भूमिपतेस्तथा प्रजानाञ्च सुखसम्पत्॥
जीवितराज्यविनाशं करोति मध्ये व्रणः समुत्पन्नः।
मध्ये स्फुटितस्त्याज्यो विघ्नकरः पार्श्वयोः स्फुटितः॥
अशुभनिमित्तोत्पत्तौ शास्त्रज्ञः शान्तिमादिशेद्राज्ञः।
शस्तनिमित्तः पट्टो नृपराष्ट्रविवृद्धये भवति॥")

पट्टकः, पुं, पट्ट एव इत्यर्थे स्वार्थे कन्। पट्टः॥

पट्टजं, क्ली, (पट्टात् कौषेयात् जायते इति। पट्ट+जन्+ड।) वस्त्रभेदः। पट्टवस्त्रम्। इति जटाधरः॥ (यथा, महाभारते।२।५०।२३।
"और्णंञ्च राङ्कवञ्चैव पट्टजं कीटजन्तथा।
कुटीकृतं तथैवात्र कमलाभं सहस्रशः॥")

पट्टदेवी, स्त्री, (पट्टा सिंहासनार्हा देवी।) महादेवी। इति राजनिर्घण्टः॥ पाटराणी इति भाषा॥

पट्टनं, क्ली, (पटन्ति गच्छन्ति वणिजो यत्र। पट गतौ+बाहुलकात् तनन्।) पत्तनम्। इति द्विरूपकोषः॥

पट्टनी, स्त्री, (पट्टन+गौरादित्वात् ङीष्।) पत्तनम्। इति द्विरूपकोषः॥

पट्टरङ्गं, क्ली, (पट्टं वस्त्रं रज्यतेऽनेन। पट्ट+रञ्ज+घञ्।) पत्तरङ्गम्। इति राजनिर्घण्टः॥ वकम् इति भाषा॥

पट्टरञ्जनकं, क्ली, (पट्टानां वस्त्राणां रञ्जनम्। ततः कन्।) पत्तरङ्गम्। इति राजनिर्घण्टः॥

पट्टशाकं, क्ली पुं, (पट्टस्य पट्टवृक्षस्य शाकम्।) नालिताशाकम्। इति शब्दमाला भावप्रकाशश्च॥ अस्य गुणाः नाड़ीचशब्दे द्रष्टव्याः॥

पट्टार्हा, स्त्री, (पट्टे नृपासने अर्हा योग्या।) महादेवी। इति राजनिर्घण्टः॥ पाटराणी इति भाषा॥

पट्टिका, स्त्री, (पट्टिरिव कायति प्रकाशते इति। पट्टि+कै+कः। स्त्रियां टाप्।) पट्टिकाख्यलोध्रः। इत्यमरटीकायां वाचस्पतिः॥ (क्षुद्रः पट्टः। ह्रस्वार्थे कन्। स्त्रियां टाप् इत्वञ्च। वितस्तिविस्तारं वस्त्रम्। इति चिन्तामणिः॥ पट्टः। पाटा इति भाषा। यथा, नैषधे।१९।६१।
"सर्व्वं विस्मृत्य दैवात् स्मृतिसुषसि गतां घोषयन् यो धसंज्ञां
प्राक् संस्कारेण सम्प्रत्यपि धुवति शिरः पट्टिकापाठनेन॥")

पट्टिकाख्यः, पुं, (पट्टिका आख्या यस्य।) रक्तलोध्रः। पाटियालोध इति भाषा। तत्पर्य्यायः। क्रमुकः २ पट्टी ३ लाक्षाप्रसादनः ४। इत्यमरः। २। ४। ४१॥

पट्टिकालोध्रः, पुं, (पट्टिका एव लोध्रः।) रक्तलोध्रः। पाटिया लोध इति भाषा। तत्पर्य्यायः। क्रमुकः २ वल्कलोध्रः ३ वृहद्दलः ४ जीर्णबुध्नः ५ वृहद्वल्कः ६ शीर्णपत्रः ७ अक्षिभेषजः ८ शावरः ९ श्वेतलोध्रः १० गालवः ११ वृहत्त्वचः १२ पट्टी १३ लाक्षाप्रसादः १४ वल्कः १५। इति राजनिर्घण्टः॥ स्थूलवल्कलः १६ जीर्णपत्रः १७ वृहत्पत्रः १८। इति भावप्रकाशः॥ लोध्रद्वयगुणाः। कषायत्वम्। शीतलत्वम्। वातकफास्रविषनाशित्वम्। चक्षुष्यत्वम्। तत्र वल्कलोध्रकोविशिष्टः। इति राजनिर्घण्टः॥ ग्राहित्वम्। लघुत्वम्। पित्तरक्तपित्तातीसारशोथनाशित्वञ्च। इति भावप्रकाशः॥

पट्टिलः, पुं, (पट्टो विद्यतेऽस्य। पट्ट+अस्त्यर्थे इलच्।) पूतिकरजः। इति जटाधरः॥

पट्टिलोध्रः, पुं, (पट्टिरेव लोध्रः।) पट्टिकालोध्रः। इति शब्दरत्नावली॥

पट्टिलोध्रकः, पुं, (पट्टिलोध्र+स्वार्थे कन्।) पट्टिकालोध्रः। इति शब्दरत्नावली॥

पट्टिशः, } पुं, (पट् गतौ+बाहुलकात् टिश(स)
पट्टिसः } च।) अस्त्रविशेषः। यथा,—
"परशुः पट्टिसो नाम स एव च परश्वधः॥"
इत्यमरटीकायां भरतः॥
(यथा, भागवते। ८। १०। ३६।
"भुशुण्डिभिश्चक्रगदार्ष्टिपट्टिशैः
शक्त्युल्मुकैः प्रासपरश्वधैरपि।
निस्त्रिंशभल्लैः परिघैः समुद्गरैः
सभिन्दिपालैश्च शिरांसि चिच्छिदुः॥")

पट्टी, स्त्री, (पट्टि+वा ङीप्।) पट्टिकालोध्रः। इति राजनिर्घण्टः॥ ललाटभूषा। इति विश्वः॥ तलसारकम्। अश्ववक्षःस्थलबन्धनरज्जुः। इति शब्दमाला॥

पट्टी, [न्] पुं, (पट्टोऽस्यास्तीति। इनिः।) रक्तलोध्रः। इति स्वामी॥ इत्यमरटीकायां भरतः॥

पट्टोलिका, स्त्री (पट्टं पट्टाख्यं उलति प्राप्नोतीति। उल गतौ+ण्वुल् टापि इत्वम्।) कृत्प्रकीला। यवस्थापत्रं इति केचित्। पाट्टा। इति च केचित्। इति त्रिकाण्डशेषः॥

पठ, वाचि। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) पठति श्लोकं धीरः। इति दुर्गादासः॥

पठनं, क्ली, (पठ्+भावे ल्युट्।) वाचनम्। पड़न् इति भाषा। यथा, मार्कण्डेये। ९२। १८।
"भूतप्रेतपिशाचानां पठनादेव नाशनम्॥"

पटमञ्जरी, स्त्री, श्रीरागस्य चतुर्थरागिणी। तस्या न्यासांशग्रहाः पञ्चमः। गानसमयस्तु एकप्रहरदिवसोत्तरम्। इति सङ्गीतदर्पणः॥ लक्षणं यथा, सङ्गीतदामोदरे।
"वियोगिनी कान्तवितीर्णपुष्पां
स्रजं वहन्ती वपुषातिमुग्धा।
आश्वास्यमाना प्रियया च सख्या
विधूसराङ्गी पठमञ्जरीयम्॥"

पठषमञ्जरी, स्त्री, रागिणीविशेषः। इति हलायुधः॥